Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. ६६२ - घ

Title प्रायश्चित्तप्रदीपिका

Author भास्करः

Extent ९१ Age

Subject धर्मशास्त्रम् - अपूर्णा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

४० पत्राणि

नं० ६६२-घ

प्रायश्चित्तप्रदीपिका (असंपूर्णा)

नं० ६९२-घ

(धर्मशास्त्रम्)

(२० संख्याकपत्रमनुपलब्धम्) पत्राणि ४०/४१

१५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ५८२९
प्रायश्चित्तप्रदीपिका
५८२-५८
४० पत्राणि

४० पत्राः हैं

प्राश्चित्तप्रानदयीव्याख्या केशवी

वस्ता

२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

के. १

श्रीगणपतयेनमः आरभ्यातोभास्करोयंणप्रायश्चित्तप्रपाटकः शान्तहूयेनश्लोकानांधर्तेस्वाम्यनुमारतः तान्कृत्वामनसिश्लोकांतदर्थमनुसंदधत
करोमिसारवबोधायप्रायश्चित्तप्रदीपिकां ॥यस्याकृतावितिश्लोकस्य॥तत्रप्रथमंभाव्यकारेणाकृतिलक्षणंप्रायश्चित्तंविध्यपराधेविधीयतइति
एतावद्रूपः सूत्रद्वयात्मनाआरभ्यातः अनंतरमेकसूत्रतयाचप्रयोजनवशात्॥सूत्रद्वयात्मनाकृतस्यव्याख्यानस्यायमर्थः आकृतिलक्षणंप्रा
यश्चित्तमित्येकंसूत्रमस्यायमर्थः यस्यपुरोडाशः क्षपयतिपरेकरेवसाआलब्धोभयान्भवतियद्यपापरीत्यन्तद्ध्येतेत्येवमादिषुल
क्षणमात्रमेवयस्यप्रायश्चित्तस्याकृतावुपदिश्यतेनतुआकृतिलक्षणमितिअनतश्चिद्रूमात्रस्यवोपादेशात् पुरोडाशयोः पुरोडाशानांच
क्षामेद्वादशकपालोपघांशोडशकपालेचैरेप्रायश्चित्तंस्यात्॥इतरथापद्युनायजेतितिचलिंगासंख्यायोरपिविवक्षास्तिचेत्॥एकपुरोडाशस्य
क्षामेषट्कपालोपघांचैवप्रायश्चित्तस्यावकाशः नान्यत्रानुआलब्धोभयान्भवतीतिपुंल्लिंगनिर्देशात् लिंगेविवक्षितेगर्भिण्यांप्रायश्चि
त्तानवकाशः एवंसंख्याविषये॥तस्मात्सूत्रमादि॥निमित्तमेवोपादायप्रायश्चित्तविधिः नैमित्तिकंविध्यपराधइतिश्लोकस्यविध्यप
राधेविधीयतइतिअस्यार्थः विधीयतइतिविधिः कर्मणिकिमत्ययः विधीयतेक्रियतइत्यर्थः विधिरितिकर्म अपराधेस्यपाकर
णंअकरणंवाविधेरपराधेविध्यपराधः तस्मिन्विध्यपराधे कर्मान्यथाकरणाकरणेइदंप्रायश्चित्तंविधीयते॥यथायस्यानोवारुपो
वात्तराग्नीयात्रीत्यादिनोक्तप्रायश्चित्तमविधाने नरपादीनांअंतरागमनेयत्रचोदनानास्तितत्रप्रायश्चित्तं॥यथावाजपेयेरथेअनभि
चरक्षिणाभृते अंतराग्नियजमानेहिरण्यपाणिरग्रेणगार्हपत्यंनयतीतिचोदितत्वात्प्रायश्चित्तं॥याणापंसत्रयपाणोपिनवास्तो
ष्पतीयहोमः वृसोरदनाग्नेरित्यादिसार्धश्लोकस्यअथाकृतिलक्षणंप्रायश्चित्तंविध्यपराधेविधीयतइति॥एकसूत्रतयायोजना

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

विधीयते वो यते ब्राह्मणेनेति विधिः श्रौतं कर्म तस्यापराधे अन्यपाक्रियायां वषट्कृति लक्षणं ॥ विस्मृतं प्रधानस्यापरिसमाप्ते एतदिति प्रायश्चित्तं
कृत्वा कर्तव्यं समाप्ते प्रधाने तदिति प्रायश्चित्तमेव ॥ तथाग्निहोत्रादीनां प्रोक्षणादौ संस्कारे स्वकाले तु त्रेद्धमप्रक्षेपणाद्युत्तरोक्षणप्रयोगाद्युप
योगात् ॥ पूर्वस्मृतेन तदिति प्रायश्चित्तं कृत्वा कर्तव्यं ॥ उपयोगात् पश्चात्संस्कारस्य लोपे एवं तदिति प्रायश्चित्तं तु कर्तव्यं ॥ कर्मणां मंत्र
स्य लोपे तदिति प्रायश्चित्तं कृत्वा पुनस्तस्य मंत्रस्य जपः कर्तव्य इति ॥ बौधायनेन भागवतोक्तं ॥ यत्रांगलोपे विसागप्रायश्चित्तं वि
धीयते तत्र स्मृति लक्षणमिति ॥ तत्रैतन्मूलमिति यत्र श्रौतकर्मणोपराधोऽभयस्य प्राप्तिः तत्र व्याहृति लक्षणमेव नेतरदिति उदाहरण
त् ॥ यदा औपासनः सर्वत्राहितः तस्मिन्दर्शतनपाकाद्धूर्ध्वं समारोपणतः प्रागनुगच्छति तदा नायाभ्येति स्मृति लक्षणं प्रायश्चित्तं ॥ यदुप
पायाद्नुगच्छेत ब्रह्मौदनपक्वायेनो येन हृतं नाम समिध आदध्यादिति व्याहृति लक्षणमेव ॥ विध्यपराधे व्याहृति लक्षणमेव विधीयत इति
नियमात् ॥ अग्न्यन्तरेऽस्या औपासनस्योक्तानैव भवति ॥ प्रकारांतरस्यानुपदेशात् ॥ पाकान्त्यं स्मार्तप्रायश्चित्तं ॥ विध्यपराधे व्या
हृति लक्षणं विधीयत इति वचनात् ॥ गृह्यापराधे श्रौतस्मार्तं च भवति प्रायश्चित्तं ॥ यथा पर्याहितदोतत्र प्रयोगः औपासनः सर्वोग
औपासने करदेशे वानिर्मथ्यो वा ब्रह्मौदनिकाग्निर्भवति ॥ तत्र यदा औपासनिकः सर्वो ब्रह्मौदनिकस्थापितः ब्रह्मौदनिकपा
कात्पूर्वं यद्यनुगच्छेत्तदानुगतो मंथ्याश्रोत्रियागाराद्वाहृत्य मन्थनया प्रक्रियया अग्निमुत्पाद्य नुगच्छेत्तदानुगपत्र कृत्वाग्निमिति वि
धिनाग्निमुपसमाधायाम्ययात्स्या उत्तरेण पूर्वेणवा मध्ये परिध्याद्विमंतं कृत्वाग्निं परिस्तीर्याग्नेरुत्तरतः दर्भान्संस्तीर्य तेषु दर्भेषु दवीमाज्यस्थाली
प्रोक्षणीस्रुवं प्रकृत्य पवित्रे कृत्वा प्रोक्षणीसंस्कृत्य पात्राणि प्रोक्ष्याज्यनिर्वापादिसुकृतसमार्जनान्तमेतदरणांतं कृत्वाग्निं परिषिमाय यास्त्रेति

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ऽक्तहोत्रिमवेप्रायश्चित्तं च पुनरग्निं परिषिंचति ॥ औपासनैकदेशश्चेत्पुनरपि निर्मथ्य निधाय सर्वप्रायश्चित्तं ॥ चरुस्थौदनपाकादूर्ध्वं यद्यनुगच्छेयुः
२ तदाग्नीनामुत्पत्तिः हृक्कैनैवप्रकारेण ग्रहणात्पुनर्व्रस्थौदनपाको वरदानांतः कर्तव्यः नाप्यश्चेति स्मार्तप्रायश्चित्तं ॥ पर्याहिताग्नीनां द्विपुरुषदोषेषु ॥ यत्नमआ
त्मनो मिश्राम् सुवर्णाग्निश्चक्षुरादिमे ताभ्यां समभिनिर्मुक्ताभ्यां इति मारिति श्रुतिलक्षणां प्रायश्चित्तं अभिमुक्ताभ्यां इति नकुलवीरपावदंतौ मादिस्म
ति विहितं प्रायश्चित्तं कर्तव्यं ॥ एको निमित्तस्येत्यर्धस्याश्लोकस्य ॥ कर्मांगोपराधरकामिनिमित्ते विहितानि प्रायश्चित्तानि समुच्चयानि कर्तव्या
नि ॥ यथाग्निहोत्रस्कंदने अस्कानिमभिमंत्रणां उन्नंभयं पृथिवीमित्यभिरूपसर्जनमाहोतो सार्पं नाश्नीयादित्यनशनं च ॥ दर्शपौर्णमासाति
पत्तौ पाथिकृतिवैश्वानरीमेवमादि ॥ अपाँतरत्वाद्भिन्नप्रयोजनत्वात् ॥ तथाहि अग्निहोत्रस्कंदने निमित्ते अभिमंत्रणस्यास्यप्रयो
जनं ॥ अपामुपसर्जनस्यास्यादनशनस्याप्यदित्यादिलोके यथास्यामयारौ अंजनेन दोषहरणां आश्चोतनेन रुजापाकरणमिति दृष्टांत
रविहितानि प्रायश्चित्तानि ॥ विकल्पेनाभवंतिन समुच्चयेन ॥ यथास्तायासिचामीत्यभिमंत्रणं देवांजनमजूत्यन्तरूमेकेषामिति वा ॥ सामान्यवि
शेषाभावे तु सामान्यस्य विशेषेण बाधएव ॥ यथायदिगार्हपत्य आहवनीयो वानुगच्छेत्तं भ्यएवा वा सणोभ्यो धिमथित्वयूत्यादेः सामान्यस्य यथा
न्वाहिताग्नेराहवनीयोनुगच्छेदन्वग्निरुषसामग्रमख्यदित्यंप्रणीयेत्यैवमादिनासत्रांतरेण ॥ जपो होमो प्रायश्चित्तं विहीतद्रूयपर्षमन्त्राप्यपरुष्य
आम्नायते ॥ यस्मिन्निमित्ते यत्र सूत्रं चित्रं देवमितिदानमेव विहितं तत्र सर्वप्रायश्चित्तहोमो वा नाम्नातजपो वा दोषनिर्घातार्थः कर्तव्यः एवं य
त्रयत्रगार्हपत्यादन्यं प्रणायेत्पुनरग्निमुपसमिंध्यात् ॥ एतं प्रविशानीति प्रणयनोपसमिंधनादीमेव विहितानि न जपो होमो वा तत्र तत्राम्नात
जपः सर्वप्रायश्चित्तहोमो वा कर्तव्यः निमित्तिकं कार्यमित्यर्धस्योत्तरस्य सार्धश्लोकचतुष्टयस्य ॥ गृहीदृहस्पयस्यपे सामवनूरूमादिप्रा
यश्चित्तेष्वन्यो निमित्तान्तरमेव कर्तव्याः न प्राकृतिकालपर्वाप्रेक्षते ॥ सामान्यविधानसिधोवसंताधानकालः पुनराधानकाले

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पर्वापेक्षते॥ सामान्यविधानसिद्धो वसंताद्याधानकालः पुनराधानकालेऽपि नादरणीयः यदा आधानपुनराधानयोर्निमित्तं संजातं तदनंतरमे
वतयोः प्रवृत्तिः नष्टे ह्यग्नि पुत्रविनाशे निमित्ते संजाते निमित्तानंतरमग्नीनुत्पादय॥ पुत्रविनाशे निमित्तमेवं ग्न्युत्सर्गं कृत्वा पुनराधीतं गृहेह्
होमगैष्ट्यादीनामापणौ चमध्येऽपि निमित्तानंतरं कर्तव्यो नैव॥ पुत्रजन्मनि तु जातकर्माकरणे स्तनपानायोगात्॥ स्मार्तमपि पूर्वजातकर्म कर्तव्यं पुत्रस्य
प्राणधारणार्थं तन्नो जीवति पुत्रे शुचित्वनाकर्तव्यप्रकृतिवद्धि कृतिः कर्तव्येति शास्त्रसिद्धं शुचित्वं पर्वकाले चोपमस्य शौचनंतरं पर्वणि जाते चिः
कर्तव्यता॥ यदान्याग्न्याभागाद्याधानगर्भकाले विस्मृतं प्रधानस्यापरि समाप्तेरंतरित प्रायश्चित्तं कृत्वा कर्तव्यं॥ समाप्ते प्राधानांतरित प्रायश्चि
त्तमेव॥ तथाग्नीहोत्राधानादीनां प्रोक्षणादौ संस्कारे स्वकाले तु प्रेरधमप्ये पराणुप्ते ज्ञाराद्यागाद्युपयोगात्॥ पूर्वं स्मर्ते तरित प्रायश्चित्तं कृ
त्वा कर्तव्यं॥ उपयोगात् पश्चात्संस्कारस्य लोप एवांतरित प्रायश्चित्तं तु कर्तव्यं॥ कर्मणामंत्रस्य लोपं तरित प्रायश्चित्तिं कृत्वा पुनस्तस्य मंत्र
स्य जपः कर्तव्य इति बौधायनेन भागवतोक्तं॥ यत्रागलोपेपि प्रागस्य प्रधानस्य पुनः प्रयोगे वचनमस्ति॥ यथा मानुष्याधानर्जुहूयात् पा
त्रासमिष्टिमनन्वगांतन्वीमादित्यत्र सांगस्य प्रधानस्य पुनः प्रयोगः कृत्स्नप्रयोगस्यांतरेणापि वचनं गौणकालातिपत्तेः प्राक्मुख्यकालाति
पत्तिप्रायश्चित्तं कृत्वा भवत्येव॥ यथा पर्वातिपत्तौ पाथिकृतीं वैश्वानरीं च कृत्वा आगामिपर्वणोरन्वाधानकालात्प्रागतिपन्नो दर्शपूर्ण
मासो वा कर्तव्यः दर्शपूर्णमासादीनीं गौणकालादि दानकारणोक्ताः सर्वामाहुः प्रातराहुतेच्छानेसर्वारात्रिः सायमाहुतेः आपूर्यमा
णो दर्शस्य कृत्स्नः पौर्णमासस्य पश्चः पूर्णोसंवत्सरे सोमस्य॥ एतेषु गौणकाले घतीतेषु प्रायश्चित्तमेव न सकृदपि दर्शपौर्णमासादी
नो अतिपन्नानां प्रयोगः उत्तरेषां दर्शपूर्णमासादीनां कालत्वादतिपन्नानामकालत्वात्॥ अकाले कृतमकृतमिति॥ यत्र दर्शपौर्ण
मासादौ प्राधानानामाग्नेयादीनामन्यतमस्य लोपः तित्र समाप्तेः प्राक् निर्वापादितस्य कर्तव्यं॥ समाप्ते तत्र आग्नेयादीनां यस्य प्रधानं लुप्तं त

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्यान्वाधानादिप्रयाजान्याजसहितेनैतंत्रेणनः प्रवर्ततेमुख्यकालोतिपन्नश्चेत्सर्पिष्कृत्यादिप्रायश्चित्तिंकृत्वासांगंप्रधानंकर्तव्यं अन्वाहितेग्निरिति
२ श्लोकद्वयस्य॥ अन्वाधानेकृतेयदियजमानस्यदैवान्मानुषाद्वाभयात्सगृहप्रयाणंभवति॥ तदासगृहः प्रयायात्॥ सोग्निवृद्ध्वासर्वाण्युपकरणानि
3 यानेसमारोप्याहवनीयेयक्ष्यमाणोजुहोति॥ जुष्टंताअग्निरस्तुम० येमिरस्वाहा॥ अग्नयेकामायाअन्वाहितानाधार्यतस्याग्नीन्समुपकृत्यग
रण्योःसमा॥ रोपयेत्॥ अयंतेयोनिरित्यनिमंत्रोमंत्रः प्रत्यग्निमंत्राहृताग्निः अरण्योर्मर्दयेत्तमपरहितेनदेशंगत्वाग्नीनपिचोपवरोहजातवेदइ
तिनिवर्तमानजपंकृत्वायतनेषुप्रतिष्ठाप्यइदंश्रयोवसानमित्यवसितहोममाहवनीयेजुहोति॥ द्यावापृथिवीभ्यांदिग्भ्यश्चइद॥ अव
सितहोमश्चिकालवासविषयएवनकतिपयदिनवासे॥ अपकृतांतादारभ्येष्टिंसमापयेत्॥ भयाद्धितप्रापणात्॥ एवंयदीष्टिकालोतिपन्नः
तत्रनिर्वापात्पूर्वंगमनंचेत्॥ निर्वापकालेअग्नयेपथिकृतेजुष्टंनिर्वपामीत्याग्नेयंनिरूप्यप्राग्वन्मितानिहवींषिनिर्वपतिनिर्वापादूर्ध्वंगम
नंचेत्स्विष्टकृतोयाज्यानुवाक्ये। स्थानेपथिकृतोकुर्यात्॥ उद्वातववद्धेरिमान्दिनवश्लोक्याः अन्वाहितेष्वग्निषुयद्याहवनीयोगच्छेत्॥
अन्वग्निरुषसामग्रमख्यदित्यनेनस्यप्रणीयभूरितिमनसोपस्थानंकुर्यात्॥ मनसोपतिष्ठेतिश्रुतेः ततः आज्यपूर्णेनस्रुवेणजुहोति॥ योअ
ग्निंदेववीतयेमहयस्वाहेति॥ अग्निः पावकोदेवतातत्तोजुःस्राज्जुहोति॥ इदंविष्णुः पाहिरेस्वाहाविष्णुर्देवानामनसायजमानोजपति॥
अग्नेव्रतपतेव्रतंचरिष्यामितराध्यासमिति॥ यदिगार्हपत्योनुगच्छेत्॥ गार्हपत्यानुगतभस्मनाप्रधानारणीसंस्पृश्यमथित्वायतनेनिधायभू
रित्युपस्थानादिव्रतोपायनीयवर्जंपूर्ववत्कुर्यात्॥ दक्षिणाग्न्यनुगतोगार्हपत्यात्वयोनिर्मथ्येत्॥ हेमीगार्हपत्यात्प्रणीयभूरित्युपस्थानादि
व्रतोपायनीयांतंसमानं॥ तत्रपायोनिर्मथ्येदुभयाद्यभूरित्युपस्थानादिसमानं॥ सभ्यावसथ्ययोरनुगमनेयोनितउत्पाद्यभूर्भुवस्वः स्वाहे
तिसर्वप्रायश्चित्तंआहवनीयेजुहोति॥ केचिद्धोमव्यतिरिक्तंतस्यतस्याग्नेः कृत्वाहोममात्रमाहवनीयएवेच्छंति॥ तस्मिंतस्मिन्नग्नावित्यस

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सोमयागेषु। सर्गीयार्थे अन्वाधाने कृते उत्तरवेदिप्रणयनात्पूर्वं प्राग्वंशगतानामग्नीनामनुगमने अन्वाहितानामनुगमने आसमारोपेरन्वाहित
प्रायश्चित्तमेव॥ प्रणीते चौत्तरवेदिके शालामुखीयानुगमने तु गतावस्थमारणेऽरणी कृत्वा निर्मथ्य निधाय भूरित्युपस्थानादि॥ अवधारणा
भावे लौकिकाग्नौ भस्मनाशे संस्पर्शमपि त्वा निधाय भूरित्युपस्थानादि॥ शालामुखीयप्रणीतैः कृतानां अनुगमने आसमारोपेरन्वाहितप्रायश्चि
त्तमेव॥ आग्नीध्रीयप्रणयनात्पूर्वं उत्तराग्नीनामनुगमने अन्वग्निरुषसामिति शालामुखीयात्प्रणीतो योऽग्निरसि इत्यादि मन्त्रेणोपायनान्तं समानं॥
उत्तरवेद्यामग्नौ प्रणीते तमावेऽनुगतेऽन्वग्निरुषसामित्यादि मन्त्रेणोपायनं इडःपीतं कृत्वाऽग्नेः पुरीषमसीत्यादि शेषं कुर्यात्॥ केचित्तु नष्टे वाहव
नीये प्रणयनीयमिध्मारभ्य होतुरनुवचनेन सहाऽन्वग्निरित्यग्निमुखस्याग्ने बाधस्वेति प्रतिष्ठाप्य भूरित्युपस्थायेत्यादि मन्त्रेणोपायनजपान्तं कृ
त्वाऽग्नेः पुरीषमसीत्यादि कुर्वन्ति॥ आग्नीध्रीयप्रणयनोत्तरकालं आग्नीध्रीयोत्तरवेदिकाशालामुखीयानामनुगमने येषां शीघ्रितानां
माहवनीयोऽनुगच्छेदित्युक्तप्रकारेणान्तं तमग्निमुत्पाद्य सर्वप्रायश्चित्तमहे। विष्णो वरेण्यं च॥ पाशोपस्थितिमारभ्य आसमाप्तेः सर्वाग्नी
नामन्वाहितानुगमनप्रायश्चित्तमेव॥ उत्तरवेदिप्रणयनादारभ्य शालामुखीयानुगमने वक्ष्यमाणं मथनं तदभावे भस्मनाऽरणीसंस्पर्शमपु
नैतत्वो भूरित्युपस्थानादि॥ पाकात्पूर्वं शामित्रस्यानुगमने योनितउत्पाद्य सर्वप्रायश्चित्तमौत्तरवेदिके जुहोति॥ पाकादूर्ध्वं नाग्न्युत्पत्तिः पुरुहो
मस्य लोप एव॥ उत्तरवेदिके सर्वप्रायश्चित्तं अनाज्ञातादित्रयं च जुहुयात्॥ तत्र लौकिकेऽग्नौ गृहहोमं कुर्वन्ति॥ अन्वाहितयोर्गार्हपत्याहवनी
ययोः सूर्योदये तदस्तमयेऽपि नोभयानुगतिनिमित्तमाधाने पुनराधानं वा कर्तव्ये॥ सामान्यस्योभयानुगतिनिमित्तस्याऽन्वाहितोक्तप्रायश्चि
त्तेन बाधात्॥ आधानमध्ये गार्हपत्याधानार्थं मन्थनादारभ्य पूर्णाहुत्यंतं यस्य कस्याप्यग्नेरनुगमने पूर्णाहुत्यन्ताधाननिष्पाद्यानामग्नी
नामनिष्पन्नत्वात्॥ मथोगतानुगतो यदि गार्हपत्य आहवनीयोऽनुगच्छेदिति नैमित्तिकं कर्तव्ये॥ अन्वाधानात्पूर्वं अन्वाधानप्रायश्चित्तं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सर्योर्द्यात्पूर्वं गार्हपत्याग्नावनाहितेपि प्रयोगं परित्यज्य कालांतरे आधानं कर्त्तव्यं ॥ पूर्णाहुतेः प्रागपस्य कस्यचिदंगस्य लोपेपि पूर्णाहुतौ हु
४ तायां भुवस्वाहेति दक्षिणाग्नौ यजुर्भ्रेषनिमित्तहोमः अहुतायां पूर्णाहुत्यां माहवनीयादीनाम निष्पन्नत्वात् ॥ वरदानशिवाजपयोः पूर्णाहुत्यंग
त्वात्तु शिवाजपांते प्रायश्चित्तहोमः कर्त्तव्यः केचित्सोष्टिकाधानस्याहवनीये निष्पादकतामंगीकृत्य इष्टीनामध्येयाग्नीनामनुगमेन प्रयोगं
5 त्यक्त्वा कालांतरं आधानमिच्छंति ॥ कल्पसूत्रानुवर्तिनस्तु पूर्वोक्तमेव कल्पमनुतिष्ठंति ॥ तेषामिष्ट्यर्थमन्वाधानमारभ्याश्वाहितानु
गमनप्रायश्चित्तमेव प्रयोजनं यतः शम्यापरासापगतिरिति भाष्यो कल्प ॥ कृत्वाथन्वाधानस्यानुकृतान्वाधानस्य वाहिताग्नेरग्नीनामनुगमः
वसेनाद्याधानकालः पुनराधानकालः पुनराधानकालेपि नादरणीयः यदा आधानं पुनराधानयोर्निमित्तं संजातं तदनंतरमेव तयोः प्रवृत्तिः
नष्टेग्निपुत्रविनाशे निमित्ते संजाते निमित्तानंतरमग्नीनुत्पादयेत् ॥ पुत्रविनाशे निमित्तमग्न्युत्सर्गं कृत्वा पुनराधीत ॥ गृहदाहे सर्वौषधी
नां माषणोश्च मध्येपि निमित्तानंतरं कर्त्तव्याश्चिदग्निः केनचिद्दासेन प्रविधा शम्यापावत्पद्य निपतति तावन्मध्य निःस्रवविधाने नाग्ने ताग्नेर्गम
नएवेद प्रायश्चित्तं कर्त्तव्यं यदि तावद्दपस्थाये दिति भ्रातेः अपगतमग्निं परि वाजपतिः कविः सोमपष्टुतिविः प्रदक्षिणीकृत्य तमारोपयेत्स्मादि
गेतिः स्तच्चैव पुनः क्षिपतिमेत्रेण ॥ दूरं गतं कं जनित्रेद्रूति आहवनीये सर्वप्रायश्चित्तहोमः शम्यापरासाद्वागमनेपरिक्रमणवर्जं तत्कीम
भत्पसर्वप्रायश्चित्तं ॥ केचिच्छम्यापरासो मर्यादेत्याहुः तेषां मते यत्र यत्र परिक्रमणं शक्यते कर्तुं तत्रापगमनेमंत्रेणापरिक्रमणं संभरणं
च कर्त्तव्यं ॥ शम्यापरासात्परतः इति भाष्यो कल्प ॥ शम्यापरासात्परतो पश्चादागतं दे शमग्नीनसमारूढानप्रत्यक्षनीतायोग्निर्देशांतरंगतस्त
द्गणामितराग्नीनप्रतिष्ठाप्यतत्रैकमहार्वं स्येत् तस्मिन्नहनि तेष्वग्निषु पात्र कृतिमिष्टिं निर्वपेत् ॥ तस्याः प्रयोगः इष्ट्याय प्लेविधु
द्गिपो गामासीतं त्वं यद्यस्ताय ॥ यस्यांनपाविषिस्तस्याः स्तियेः कीर्तनं । एष ९ हविः अध्वर्युः पर्यांति काहूहिं ए हहे स्पष --- था

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दूर्हिरा हरणं ॥ पात्रासादनकाले षोडश कपालानि स्थाप्यन्ते ॥ अन्वाहार्यस्थाली वर्जं प्रकृतिवत् ॥ निर्वपणादिः । निर्वापकाले अग्नये पथि
कृते जुष्टं निर्वपामि अग्नये पथिकृते त्वा इदं रक्षस्व ॥ अग्नये पथिकृते वो जुष्टं प्रोक्षामि ॥ एवमधिवापसीवापौ ॥ अग्नये पथिकृते जुष्टम
भिघारयामि ॥ प्रियेणेध्मासादनं ॥ यज्ञोसि अयं यज्ञो ममाग्ने च तु हीं तेमासन्नाभिमर्शनं ॥ अग्नये पथिकृते गृह्णि ॥ अग्निं पथिकृतं यजः
अग्नेः पथिकृतो हम्मन्नादः तयाविंशेन होमः । विहूत्यप्राशित्रं च तु धा करणं ॥ दक्षिणाकाले ववैयनडुहीं स्थापयित्वाग्नये पथिकृते स्वेत्यनडुहेना
भिमृश्य सहस्रधारा उत्सो अक्षीयमाणः तेना नस्तु ह्यानि तत्र शोभमानामित्यनडुहेनाभिमृशति वस्त्रं ॥ वस्त्रं तु वत्साशीमत्यनडुहेनाभिमृशति ॥
ब्राह्मणा अर्थवन्निज्ञानिस्पृहः कृत्ह्यण्यगामिति प्रतिगृह्णः आग्नेः पथिकृतो हम्सुज्ञितिं ॥ यज्ञो बभूव यज्ञ शं च मवर्जं ब्राह्मणतर्पणान्तमिष्टिः
समाप्यते ॥ तस्मिन्नहनि तत्रैवाग्निहोत्रहोमं कृत्वा ॥ ततः श्वोभूते ग्निभिः सह तं देशं गत्वा प्रकान्ताग्निहोत्रहोमं परिसमाप्यानन्तरं पथि
कृती कर्तव्या ॥ ग्रामिमध्ये पशुमध्ये वा वत्साग्नो आग्निभिः सह तं देशं गत्वा तद्देवतं चरुं पजीम पाथिकृती । निरूप्य कृत्वा नारम्भतत्र समा
प्तिः सर्वत्र श्वोभूते ग्रहान्प्रतिगच्छति ॥ सोमेष्टी क्षादिने श्वेववत्सायाग्निभिः सह देवयजनं गच्छति ॥ उपवसत्स्ववत्साया नु छोमीसे अभ्यस सर्वं प्रा
याश्चित्तं न देशान्तिरगमनं स प्रोन्कर्षप्रसंगात् ॥ सर्वं च वत्सा दुग्धं भ्रोकस्य ॥ यदि सान्नाय्यार्थमपाकृता वत्सा निःशेषं पिबेयुस्तस्य
पीतस्य हविषः स्थाने वायुदैवत्यं यवाग्रं निर्वपेत् ॥ तस्याः प्रयोगः रात्रौ स्याप्राग्निहोत्रहवणीम् पर्पचोत्तरेणागार्हपत्यं प्रयुक्तस्य तः पात्रीं
प्रयुज्य पवित्रे कृत्वा संविशन्तानित्यभिमृश्य पवानस्य तासी साराभ्य वायवे जुष्टं निर्वपामीति निरूप्य निरूप्ते घन्तो प्योपवसेत् ॥ श्वोभूते क
र्माणि वासिमारभ्य पात्रासादनकाले प्रफक्तानि प्रयुज्य प्रातर्दोहपात्रैः सह यवागूपाकार्थं पात्रं प्रयुनक्ति ॥ रात्रौ निरुप्ते प्रयौ होष्य आग्नेयपति
र्वापः निर्वापो त्तरमाग्नेयस्य पूर्वं प्रयोगः अग्ने हमिदं रक्षस्व वायो हव्यं रक्षस्वेत्यादि ॥ प्रागधिवपनाद् आग्नेयेन सह सो स्पणादि कृत्वा ततो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

के· यपाभागं आवर्तेयामिति विभज्य द्रव्यमग्नेरिर्दं वा यो गिराभिमर्शाग्ने यस्या एव त्विकुरु तादि त्यं नैर्ऋत्य पेषणं कृत्वा कपालान्युपधायय वा गृह्य प्रणीयो स्थाल्यां
५ प्रक्षो भक्षीत्युपधाय प्रातर्दोहे कृत्वा पिष्टानामुत्पवन काले तं दुग्धानुत्पूयाधिश्रयणकाले आग्नेयमधिश्रित्यपयसोऽभीति स्थाप्यानन्तरं दुग्धानोप्य
5 यवाग्ं कृत्वो द्वासनां तं चरुवत्करोति वायव्ये क्षयमित्यभिघारणं॥ केचित् क्षीरमिति दधिपयसो वा पयस्थाने यवागूं निरूप्य उद्वासनादूर्ध्वं
तत्कर्मा आसन्नाभिमर्शनादयो प्यविकृता यवाग्वा भवेयुः आग्नेययागानन्तरं सान्नाय्यस्थाने पि यवाग्वा वायवैवस्यत्वात् तत्पक्षे प्रचा
रः वायवेत न्न हि वा पुष्यजेतिमंत्रे वा॥ वायो रहं देवयज्यया दिद्या विभूयासं जे मानं महिमानं गमेयमिति वा हुत्वा नुमंत्रणाय दिशो हृदयं वत्सा
पि वेषः तदा यवाग्न हृदयं प्रपति त्वा आग्नेयेन प्रवर्तयेद्यवाग्वोः सहप्रचारः एकदेवत्यत्वात् एवमिष्टौ संस्थाप्य पुनरप्यग्न्याधाना दिवसा
नपाकृत्वो पोष्य श्वोभूते यथा प्रकृतिदर्शं कुर्यात्॥ केचित्तु विच्छिन्नं दृष्ट्वा तद्देवान्वाधानं तन्त्रेण सहावर्तयन्ति॥ इतरथो ह विघोरदृष्ट्वा
न्॥ यदि त्विः शेषं नपिबेयुः तदा यागपर्याप्तं अवशिष्टं चेद् तदीन प्रायश्चित्तं सर्वप्रायश्चित्तं च॥ अनाज्ञातत्रयं च हुत्वा शिष्टेन यागः नष्ट
नीत्वा॥ आर्त्तिप्रणाश इति षट्श्लोकाः यस्य सायं दुग्धं दह्र्नापहरणादिना वा केशादिदूषणेन वा विनिष्टं त्वावेवाण्पाशना पूर्वं ज्ञात
तद्देवोत्तरेणाहर्यत्स्या हवनीयो दर्भानसंस्तीर्य यस्याग्निहोत्रं हवणी प्रपर्यं च प्रयुज्य पुरतः पात्रीं प्रयुज्य पवित्रपाणिः संविशं तामिति पा
त्रीणपिभिमृश्य वाग्यतो वानस्पत्या सिरदाशिरणाय त्वेति अग्निहोत्रहवण्या दानादि कृत्वा इन्द्राय जुष्टं निर्वपामीति ब्रीहीन्निर्वपेत् दध्याजि
नः महेन्द्रायेति महेन्द्रयाजिनः श्वपचावा पीते कृते आरण्याशनं कृत्वा ग्रामे भ्य उपवसति॥ आरण्याशनादूर्ध्वं विनिष्टमिति ज्ञाते तद्देवान्वा
वपानं करोति नारण्याशनं॥ श्वोभूते कर्मणो वामित्याद्यपात्रसंसादनकाले रौद्रमहेन्द्रस्य वा एकादशकपालानि आग्नेययस्था स्यैक
दूर्मजिनादनिर्णाचावप्रफक्ता निपात्राणि प्रफज्य प्रणीताप्रणयनं कृत्वा पवित्रपाणिरसंमृष्टानि पात्राणि संमृश्य रात्रौ निरूप्तेषु व्रीही

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्याग्नेयस्य निर्वापादि प्रतिपद्यते कपालोपधानकाले पूर्ववत् प्रातर्दोहः प्रोक्षणाद्युद्वासनान्ते आग्नेयस्य पूर्ववमुपचारं कृत्वा ऐन्द्रस्य पु
रोडाशस्य कोतिउद्वासनकाले आग्नेयाभिघार्यत् सौमैंद्रमभिघारयतिउद्वासनादूर्ध्वमैंद्रस्य पुरोडाशस्यासन्नाभिमर्शनादयः संस्कारा दधिव
द्भिर्पयेरन् प्रचरणकाले आग्नेयेन प्रचर्य दधिस्थाने पुरोडाशमवदाय प्रातर्दोहेन सह सन्नमुखेनैव प्रचारः सायंदुग्धं प्रभाते विनिष्पन्नमिति ज्ञा
तं चेत् दैवनिर्वापः नोपवासः प्रयोगक्रमः पूर्ववदेवमिष्टिं कृत्वा अन्वाभानादि पुनरीज्या कर्तव्या ॥ सत्रकारैणान्नेऽपि सायंदोहनं विना
ऽपि दोहे इयमहेंद्राय वाणकाद्दशकपालानिर्वपेत् फजसमयवानस्य प्रासिरसायनचेत् अग्निहोत्रहवण्यादानादि विहीत्रिहव्यपुरोडाशं कुर्या
त् ॥ उद्वासनादूर्ध्वमाग्नेयस्यैवायवं कृते प्रातर्दोहे विनष्टमिति ज्ञात्वा तं तावत्संस्कारात्तातं प्रातर्दोहस्थानापन्नस्य पुरोडाशस्य कृत्वा पश्चादा
ग्नेयपूर्वसंस्काराः कर्तव्याः उद्वासनादूर्ध्वमासन्नाभिमर्शनादि पयोधर्माः दध्ना सहावदायसन्नमुखेन प्रचारः पुनरीज्या च ॥ पयसा
यं दोहे विनष्टे तदर्धं पुरोडाशे कृते प्रातर्दोहस्यापि विनाशः तदापि कपालानि प्रफज्य निर्वापादि पयसास्तंनां तं पूर्ववत् कृत्वोद्वासनादूर्ध्वं
दोहधर्मेण च पौर्णमास्येयानंतरं पुरोडाशयोः सहप्रचारः कर्तव्यः पुनरीज्या च दोहद्वयस्य फणयहविनाशे सततरे विनष्टे वा तदर्थं व्रीही निर्वापा
पूर्वं तदनंतरस्यापि विनाशो यो भयविनाशः कृत्स्नप्रायश्चित्तमुच्यते ॥ प्रकृतानाशनाग्नेयाद्रम्यन् आग्नेयपंचशराववत्सोदने वा पौ कपालानि
चरुस्थाली निर्वापार्थं शरावं च प्रफज्य संमर्शवानस्य प्रासिरसायचेत् अग्निहोत्रहवण्यादानादि आग्नेयस्यान्वावापांतं कृत्वा शरावे
ण पंचशरावं निर्वपति शरावस्याग्निहोत्रहवण्यासहत्सौमासनतपने कृतं यं प्रकृति त्वान्नशराव पार्श्वमूहः त्रिर्मेत्रेणाहिस्त्सौ ॥ इदा
यजुष निर्वपामीति पंचशरावस्य निर्वापे महेंद्रायेति वा ॥ पुरोडाशपंचशरावयोर्दोहस्थानीययोरुद्वासनानंतरं पुरोडाशचरुपधर्मान्क्रियेय
रन् ॥ पात्रस्याद्वासनादोह धर्माः प्रचरणकाले आग्नेययोः सहप्रचारः अग्नेरहं देवयज्ययान्नादा रद्गुमावीभूयासं जेमानं महिमानं गमेय

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मिति॥ पंचवत्सरसाध्यायव्रतकर्मत्वात्। अथवा भयविनाशेन। द्वितीयआग्नेयः पुरोडाशः केवलश्चेंद्रः पंचशरावश्चोदनः तदाप्याग्नेयमवदाय द्वितीया
६ ग्न्यर्थं पंचशरावैकदेशमाग्नेयेन सहावदाय प्रचरेत॥ पुनः पंचशरावैकदेशादिंद्रं महेंद्रं वायजेत॥ हुता तु कर्मत्रेण पूर्ववदुभयोः उभयोः कल्पयो
रप्यन्वाधानादिपुनरीज्या कर्तव्या॥ व्रत्यव्रतोपायनमित्यादि श्लोकत्रयस्य॥ व्रत्यमहर्नाम व्रतोपायनव्रतविसर्गयोर्मध्ये उच्यते के। चिद्धूता
6 र्दमहर्व्रत्यमहः। तितेषां मते दर्शपूर्णमासादीनां निमित्तकर्मणो कालः पर्वादिन्व्रत्यमहः एषपक्षः प्रायेणानुष्ठीयते वृधैः केचित्संकल्पाद्दारभ्ये
तिवर्णयंति॥ तस्मिन्नहनियदि पत्नी रजस्वला स्यात्तदा पत्नीकर्मवर्जं दर्शपूर्णमासादि कर्तव्यं॥ रजस्वलायां पत्न्यां वेदेः पश्चाद्दुदग्रंथयो
क्तं स्त्रीयान पत्न्याभावाद्या वा काश्चिच्चिष्पत्नी करोति प्रोक्षणीरासादयेत्तस्मिन्नेषे पत्नी॥ सन्नत्येति यद्वहूयमस्य लोपः अग्नेर्गृहपत
यद्वतिगार्हपत्योपस्थानादिषु धिमन्नीकपस्थानं नानांपत्नीकर्मणां लोपः आज्यस्य पत्न्यवेक्षणावाद्मेध्यवाराणेन्कारोतीति पत्न्यवेक्ष
णनिमित्तत्वेन विहितं तेजोसीत्यधिश्रयणं तेजसे चेत्पयाहरणं च लुप्यते॥ सपत्नीयं तु हूयत एव॥ एवमिष्टिः परिसमाप्यते॥ ततः स्त्रि
रात्रातीतां पत्नीमनुगमनार्थं मुपहूयेत॥ अमूहमस्मि स्रवीर्यायेति तत्तोविष्णुर्योनिमित्यादिभिस्त्रयोदशभिर्ऋग्भिरभिमंत्र्य हिंकृ
त्यास्त्रियमुपेयात्॥ बहुपत्नीकस्य पत्नीकर्माणि रजस्वलाव्यतिरिक्ताभिः कर्तव्यानि॥ एवं दर्शपूर्णमासविकारेष्विष्टिषु पशुचातुर्मास्ये
ष्वप्यन्वाधानादूर्ध्वं रजस्वलायामपरुध्यैव यागः कर्तव्यः आरंभात्पूर्वं चेत्कालोत्तरएव यागः चातुर्मास्येषु वैश्वदेवपर्वणां यागेन्कृते
वरुणप्रघासादिषु नाऽन्येषपि मलिनां वाण्यायाः स्वे स्वे काले परुध्यैव यागः कर्तव्यः आधानमध्य इति श्लोकस्य॥ आधानेसंकल्पादा
रभ्याग्नेयस्य दक्षिणाकलात्पूर्वं यदि पत्नी रजस्वला तदा प्रयोगं त्यक्त्वा कालांतरे आधाने कर्तव्यं॥ दक्षिणादानादूर्ध्वं चेत्तत्सेष्टि कर्मा
धानमपरुध्यैवकर्तव्यं॥ आधाने प्रवृत्ते शावाद्याशौचमपि न भवति॥ अन्वारंभणीयेति श्लोकस्य॥ अन्वारंभणीयस्या आरंभात्पू

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

र्वं यदि पत्नी रजस्वला तदा कालांतरे विप्रकर्षे प्राप्ते सारस्वतं होमानारंभणीयां च कृत्वा विप्रकर्षे पिं कृत्वा पुनः सारस्वतहोमाद्यन्वारंभणी
या सह कृत्वा विहृ पौर्णमासी कर्तव्या॥ आरंभादूर्ध्वं चेदपरपक्षे वसावौर्णमासी कर्तव्या॥ अत्रापि शावाद्याशौचानि न भवंति॥ स्मार्तस्य
श्रौतं प्रति दुर्बलत्वात्॥ अग्निहोत्रारंभे यदि पत्नी रजस्वला तदा त्रिरात्री तेन सप्तहोतारं हुत्वा दशहोतारं प्रथमं अग्निहोत्रारंभः कर्तव्यः पितृपि
तृयज्ञारंभकाले यदि रजस्वला तदापि दर्शांते सप्तहोतारं हुत्वा पिंडपितृयज्ञ आरभ्यः सोमे प्रवृत्ते इति स्मृतः सोमयागे पत्न्या रजस्व
लायां बौधायनमतात्प्रयोग उच्यते॥ अग्निष्टोमद्वादशाहादिगुणकाहाहीने षारंभात्पूर्वं यदि पत्नी रजस्वला तदा कालांतरे आरंभः
यद्यारंभात्परं तत्कर्मपरपक्षे वयज्ञे तावभपास्नातायामवभृतः तस्यादीक्षारूपाशिवस्त्रयो कृत्वजवान्यादायनिर्णिज्यान्यत्र निर्धा
ति॥ पत्नीसत्यायाः पूर्वं शालायां सिकतास्वासीत मस्प्रेह निमार्जालीयं परिश्रित्य तत्र सिकतास्वासीनह विष्यमेव भोजनं॥ तत्र तपानं
रजस्वला हवींषि नावेक्षेत न स्पर्शेत् अहे पर्यवेते यदि वस्त्रं रजसोपहतं तदा लोहितं छित्वेत्म्फन्का ततो लोहितमयस्वर्णादि रपनीय वस्त्र
गोमूत्रमिश्रेणोदकेन प्रक्षाल्य दर्भपिंजूलैः पत्नी पावयति तेन स्नाना भवति॥ न स्नानं कुर्यात्॥ कात्यायनस्तु गोमूत्रमिश्रेणोदके
न पत्न्याः स्नानमाह क्षुधायां वस्त्रमोक्षजातानि समंत्रकं प्रयुञ्जीत प्रभृति कायामपि पत्न्या तारजस्वलावदपरपक्षे वावभृपापघजेत॥
दशाहे पर्यवेते तदापि रजस्वलावत्तत्पापिन्या पत्नी कर्मसंयोजयन्प्रपमप्रभवति स्नानात्पूर्वं कृत्वा पर्यं अजनादि कर्तव्ये॥ तत्कर्मतत्सु
त्रो वा स्नाता वा व्रतस्थचारी गृहस्थो वा कुर्यात्॥ तन्मंत्रं यजमानो जपेत्॥ स्नानादूर्ध्वमपि पत्नी रजोनुवृत्याहे त्वंतरेणा वास्त्रशक्त्या वाक
र्मस्व योग्या स्यात्॥ तदापि तत्कर्मकरणं मंत्रजपश्च पूर्ववत्॥ सोमाधाने विशेषः आरब्धे सोमाधाने रजस्वलायां सेष्टिकमाधानमपरु
ध्वकर्तव्यं॥ आधाने कृते सोमारंभात्पूर्वं यदि रजस्वला तदा कर्मसमाप्त्या अहन्नु सीमासिंचअपहगते स्नातायां सोममखंक त्वादि कुर्यात्॥ दीक्षि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कं॰ ७ तीयेह्नः प्राग्यदि रजस्वला तदापि त्र्यहपर्यवेते स्नातायां कुर्यात् द्वितीये तृतीये वा प्रारभ्य प्राक् प्रवर्ग्याद्यदि रजस्वलायां न कर्मोपरमः व्रतदोहना
त्प्राग्यदि रजस्वला तदा पत्न्यर्थं न व्रतदोहनं त्रिरात्रं हविष्यमश्नीयात्॥ त्र्यहे पर्यवेते पूर्ववत्॥ सोमस्त्र मिश्रेणोदकेन स्नानं कुर्यात्
7 वस्त्राण्यपि पूर्ववन्निर्णिज्य प्रपज्जीत॥ दुग्धे प्रतेच रजस्वला चेत्तद्व्रतमप्योप्य वत्सस्य हविष्यमश्नीयात्॥ चतुर्थे दिवसे स्नानादि समानं।
प्रवर्ग्यारंभकाले यदि रजस्वला चेत्तदा त्र्यहः कर्तव्यं प्रयोगजातं॥ अग्नीं ज्योतिष्मतः कुरु तेन्यत्तं समाप्योपरमेत्॥ चतुर्थे दिवसे पूर्व
वत्॥ स्नानान्ते प्रयोग शेषस्यारंभनः औपवसथ्येह्नि सद्येह्न निवारनस्वला चेत्तदावभृथान्तं कर्तव्यं॥ चतुर्थेह्नि स्नातायामवभृ
थादि कार्यं॥ निवास देशाशानस्थानानां प्रकारः पूर्वमेव व्याख्यातः यद्येकस्तनव्रतप्रभृति अनालंभुका भवति। सित्रमवभृथान्त
त्वेति बौधायनीय वचनं॥ गोपालिकेन यद्येकस्तनव्रतं दोहयतेति सं प्रैषप्रभृत्यनालंभुका भवति तामपरुध्य यजे ति व्याख्यातं॥
स च सम्प्रैष औपवसथ्यस्तु दुरयागात् प्रागेव॥ अथाध्वर्युरपरराते व्यात्सम्प्रैषशास्ति एकस्तनव्रतं दोहयतेति बौधायन वचनात्॥
तस्मादुदयागात् प्रागेवारभ्य रजस्वलायामावभृथात् कार्यमिति प्रतीतं॥ केचिदायस्तं बेनमयग वनैकस्तनव्रतप्रैषस्यानुक्तत्वात्॥ अ
त्रैकस्तनव्रतं यजमानाय प्रयच्छतीत्यग्नीषोमस्यारंभात् सर्वमुक्तत्वात्तत आरभ्यावभृथा कर्तव्यं॥ प्रातरैव रजस्वला चेद्विरमणं॥
प्रवर्ग्ये प्रवृत्ते चेत्तदानीमेवापरा। न्हिकीभ्यामिसंतं कृत्वा विरमणं मितिमन्वानाः कारिकामपि न पैवयोज्यर्यति॥ तत्रासमर्थ्यं रोच
ते स प्रोत्कर्षस्यानिषत्वात्॥ लोकपरिग्रहीतेन गोपालिकेन प्रातरह्कारारभ्य रजस्वलायामवभृथान्तं कर्तव्यातेन व्याख्यातत्वा
त् आपस्तंबेनापि सामान्येन तामपरुध्य यजेतेत्यपरुध्य यागस्योक्तत्वात्॥ अत्र सर्वत्र सत्प्रोत्कर्षनिमित्तयुनर्योगो न कर्तव्यः त्र्य
हे पर्यवेतत्वचनकृतत्वादुत्कर्षस्य॥ यदि दंरजस्वला विषयेउक्तं तद्दुहु पत्नीकस्यापि स्यात्कस्यां विदुज्जस्वलायामपि द्रष्टव्यं॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्वामित्वाविशेषात्॥ यस्मिन्काले रजस्वलायां प्रायेण प्रयोगविरमणं नोक्तं॥ तत्रैव पत्नीकर्माणि निर्मलाभिः कर्तव्यानि॥ यत्र विरमणमु
क्तं॥ तत्र च निर्मलाभिः प्रयोगः कर्तव्यः एष सूत्रवैदिकाग्निप्रमादाद्यू रजस्वला॥ नष्टं तमाहुर्विद्वांसोऽरण्याधेयं भवेत्पुनः रजस्वला चेत्कु
ताग्निमन्थोऽनं स्पृशपतेयदि॥ तापिरं षाकपालेन कर्तव्या शुचयेऽग्नये॥ यदि तु हंसी प्रमादात् रजस्वला गार्हपत्यादीनामन्यतमं मार्गि स्पृ
शति तदाग्नीन्परित्यज्य पुनराधेयं कृत्वा माहाभारतोक्ता शुचीष्टिः कर्तव्या॥ सोमे प्रागवंशगतानामग्नीनामन्यतमस्पर्शे आधानं शु
चीष्टिः उत्तरवेदिकाग्नौ प्रीयणाग्नि समारोपणीमारिष्टिष्टानां स्पर्शे स्वयोनितउपायसर्वप्रायश्चित्तं॥ यत्र यत्र होमार्थमाहवनी
याग्निः प्रणीतिः स्व च तत्र होमात्पूर्वं यदि रजस्वलास्पृशेत्॥ तदायगी समस्याग्नीनाधाय शुचीष्टिः वहरणप्रयाते पुर स्थितिविहारस्य
स्याग्नेः पितृयज्ञवेदग्ने च स्पर्शने स्वयोनितः प्रणीय सर्वप्रायश्चित्तं॥ एवं सर्वत्र के चतुष्पथाग्नेः स्पर्शने वाग्निहोत्रार्थ आपोस्पर्श
ने पुनरायतनारोप्य सर्वप्रायश्चित्तं अपो टेगार्हपत्यस्य स्पर्शने नमपोत्या पाटे करे शमात्सगार्हपत्येनिधायसर्वप्रायश्चित्तं॥ वि
धरन्मितिमार्धघ्नोकस्य॥ यदि स्नान्नायार्थमग्निहोत्रार्थं पयो वानप्यमाणानं अग्निसंयोगादुधृतं विधिस्पृदितान् अग्निं भूमिं वा प्राप्नोति
तदाह विसाराय उद्गन्त्वा वल्मीकस्य बिलमपात्त्वाप उपस्पृश्य प्रजापतेनत्वदेतानिन्य वा सा हाकारवर्जेत॥ मित्रवनीयमृषिः पति
हेत॥ नात्र मनसा तत्र हविरग्निहोत्रं चेत् अनग्निहोत्रधर्मे राहोह धर्मेणामां दुग्धी जुहुयात्॥ सान्नाय्ये चेद्दत्तौ किं कं पप आहु स्पर्म
त्रेणाकुंभीमभिमन्त्र्य वितन्वशाखापवित्रे चाम्याय रे वस्त्वा सविता पुनातिवितिकुंभ्यामामि स्रसेदुच्छ धमता वरीरिति संस्नाव्य नेचान
यति॥ दोहनलोपनिमित्तं अन्तरितप्रायश्चित्तं कुर्यात्॥ आमिक्षायां न सन्नायप्रायश्चित्तामि निमामस्त्राजमनेन तत्र सर्वप्रायश्चित्तमेव
अमेध्यसेवी एवाहुतीनो गतस्य वे सर्वथयोः अग्निहोत्रे सान्नाय्ये वा यद मेध्यपि उपसवर्तकः॥ क्रिमिः श्वयत न तदामध्यमेतमेन वा पलाश

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पर्णोन महीद्यौरिस्त्वामधमम्पां धिद्देशास्यां न नित्री यान्निहोत्रसामाये पूर्ववदुद्वासयेत् ॥ अग्निहोत्रे तेंडुलादिष्वपि कीटावपन्ने पूर्ववद्दंतः परि
१ धिदेशे स्यन्त्का सर्वप्रायश्चित्तं कृत्वास्य तद्धविः संस्कृत्य जुहुयात् ॥ यद्यग्निहोत्रमनुपरिवर्षे बिंदवः पतंति तदा भूर्भुवः स्वरिति होत्र्यंजपनी स्यंतं कृत्वा
8 मित्रो जनान्कल्पयतीति मंत्रेण स्वाहाकारांतेन पूर्वाहुतिं तेनैव हविषाहुत्वा स्कंनिमार्जनाद्यं न वेदिमार्जनांतं निकृत्वा पुनः प्रणयनमा
र्जनांतं सांगं होमं कुर्यात् ॥ केचिदिह्व वृषेन हविषाहुत्वा हृषिरसीति उपस्पर्शनीनं कृत्वा तेघावाग्नीपुरोहनादिमार्जनांतं कुर्वंति । यद्यग्निहोत्रे
पूर्वाहुतौ हुतायां उत्तराहुतिं स्कंदेत् ॥ पूर्वाहुतेरुपर्युत्तराहुतिं जुहुयात् ॥ वायत्ववेछे वनस्पतये स्वचं वा वनस्पते तिबुध्यानयास मिधमाधायस्क
न्नशेषान्न स्वीमुत्तराहुतिं जुहोति ॥ अग्निहोत्र स्वीमुत्तराहुतिः उभयत्र पूर्ववत्पुनर्होमः उत्तराहुते एषघ्य यमानाअपां पूर्वाहुता वेकदेशपतनेनै
तत्प्रायश्चित्तं अनत्तानजपराव । यदिस्कन्नं सर्वं स्कन्नमभिहुतनावहनात्तानजपकृत्वा स्त्वा त्यात्रिरभ्युक्षीययत्ववेछे वनस्पतयइत्यादि
पुनर्होमं कुर्यात् ॥ अत्यावशिष्टे त्ववशिष्टेनैव तत् स्वीमुत्तराहुतिः अनात्तानमितिसर्वप्रायश्चित्तं च ॥ मात्रापचारेण छेषेण समापयादिति
मायात् ॥ मस्राणस्यापयां स्रोत्वोपराव मंत्रस्य मध्य इति सार्धश्लोकस्य ॥ पूर्वाहुतौ हुतायां यद्याहवनीयो नुगच्छेत्तदायस्मात्काष्ठादग्निं
ततउपशांतः तस्मिन्कुकल्वेउत्तरामाहुतिमग्निदारौ दारावग्निः स्वाहेति मंत्रस्य मध्ये जुहोति यद्यनुगतश्चकलो नात्तानत्सदा हिरणपानिधा
यतास्मिन्पूर्ववज्जुहोति ॥ अग्न्याभावात्स्कन्नं प्रतिनिपनाग्निसमिंधनं परिसमूहनादि परिषेचनानांनिवृत्तिः सप्तर्षिभ्य स्त्वेफ देशेन
स्यापि ॥ केचिन्निष्टपनमनुदेशनांगमितिमन्वानाः अग्निषट्ट्समयात्पुनश्चौदेशानं कुर्वंतिस पृन्कषितन्नये ॥ गार्हपत्यदक्षिणाग्न्योः क
र्मसमाप्तिः एतेनेदं वा अत्र प्रायश्चित्तं ॥ सर्वत्रानुगमे छिमेतामे के समाम नैति ॥ अस्मिन्पक्षे अत्रापि तपस्वत द्दषिमं चादमो वा ॥ पुरा
स्कगारानेतिपादस्यायास्पुरस्तादिति श्लोकस्य ॥ यपाजार्प स्कगारानान्पूर्वं परिधिपरिधानाद्धूर्धं परिधिभ्यो बर्हिषि यद्यगारस्कंदेत्पू

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वैस्यां दिशि परिधयत्राहुतिः स्कंदेन ४ स्कवस्यमूलेन पीडयेत्॥ मा तमोमा यज्ञ निधीदस्ति। अध्वर्युं मा हिं४ सी यजमानं मा हिं४ सीरिति तमादत्ते
आहियन्तं दद्रे परिदधामीति तमग्नौ क्षिपति सहस्रक्षं गोवृषभः वीर्यपोषं चयच्छेति अंगारं तत्क्षमीमा तत्पनस्योपरि सहस्रं भगइति स्वाहा
कारांतेन मंत्रेण होमो वा॥ दक्षिणस्यां दिशि स्कंदेन मा तमो मे स्य च मुक्त्वा ब्राह्मणं॥ मा हिं४ सी यजमानं मा हिं४ सीरिति न पीडयेत्॥ अमुम
मानं॥ पश्चात्पश्चात्स्कंदेन शामा तमो मे स्क मुक्त्वा होतारं मा हिंः सीः पत्नीं मा हिं४ सी यजमानं मा हिं४ सीरिति निपीडनमिति अमन्त्र वैरा
समानं यथा उत्तरस्कंदेन मा तमो मे स्य च मुक्त्वा आग्नीध्रं मा हिं४ सी पशून्मा हिं४ सी यजमानं मा हिं४ सीरिति निपीडनं॥ अमन्त्रसमानं
प्रणीते काल इति पंचभ्यो गाः अग्निहोत्रप्रणायनकाले गृहीतो अग्नीतरव सारणमपनेभस्मनारणी सं४ स्पर्शमपनेवा क्रिय
मारोपदग्निजायेत तदा लौकिकाग्निमाहृत्य गार्हपत्यायतने निधाय पश्चादारणाद्विमार्जनांतिहोमं कृत्वा लौकिकाग्निं परिसज्य अग्निं
मथित्वा गार्हपत्ये निधाय आहवनीयं प्रणीय तत्र पश्चात्ते शिमित्राद्यो वा॥ यद्यग्निहोमकाले न जायेत तदापि लौकिकाग्नावग्निहोत्रं हुत्वा
मंथनादि पूर्ववत्कर्तव्यमिति केचिदाहुः पुनः मंथेरिति वचनादेकएव होमः प्रतिनिधौ युक्तः इति भाष्यकारमतिः तस्मादहुती यावाधोम
कालाधरिमथ्यमानो न जायेत तदा समारूढं नाशं यद्युरणपोः समारूढो न स्पेरिति पुनराधेयमग्न्याधेयं वा कर्तव्यं॥ अकृत्वा भस्मना
रणी ४ सं४ स्पर्शं मेपनमवहरणमपनं वा लौकिकाग्निप्रतिष्ठापने यस्य वो भावत्र गतानिति पुनराधेयमिति केचित् भस्मनारणी
सं४ स्पर्शमेपनेवहरणमपनेवा प्रहृतेषु द्यास्तसमयात्पूर्वं लौकिकाग्निस्थापने अग्न्याधेयमिच्छन्ति॥ अपरेऽमवृत्तेर्मपने लौकिकाग्नि
स्थापनेप्युदयास्तसमये लौकिकाग्निमाहृत्य मणो यानु धरणप्रायश्चित्तं कृत्वा मार्जनांतं होमं समाप्य मंथनादि पूर्ववत्कुर्वंति॥ प्रया
णागावरण्योः समारूढोऽग्निः प्रणापनकाले मथ्यमानेन जायेत तदापि लौकिकाग्न्याहरणादि पूर्ववत्तत्रानुगत होमः अत्र तु लौकिका

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ग्नस्थापनेपुरयात्तसमये नाम्नाधेयं पुनराधेयं वा कर्तव्यं ॥ लौकिकमाहृत्य प्रणीयावत्सरणाप्राप्य अग्निं कृत्वा अग्निहोत्रादि मित्रादिवर्जं सर्वं पू
१ र्ववत् अजस्रपक्षे तु होमकाले यो ऽग्निरनुगतो मथ्यमानो न जायेत तस्य स्थाने लौकिकमग्निं निधायाग्निहोत्रहोमं हुत्वा आमपतिं कृत्वा मित्रा
९ दिहोमाः द्विगिराग्निसमध्यावसथ्यानी अनुगमने लौकिकमग्निस्थापनादि मंत्रपनानं समानं न तपस्वन्तः ष्टिः नच मित्रादयः सर्वप्रायश्चि
त्तमेव ॥ मथ्यमानानां गार्हपत्य ख्यातिरीक्तानां आगामिहोमकालादर्जनेन गार्हपत्यादाहवनीयस्य प्रणायनं मित्रादिहोमश्च ॥ इतरेषांत्व
योनितः प्रणीय सर्वप्रायश्चित्तं च ॥ गार्हपत्यस्यानुगत्तौ आधानमेवेति कात्थिकाकारमिति ॥ तालवृंदवासिनः स्वजस्रपक्षे यस्य कस्यचि
दप्यग्नेरजस्रस्याधानमिति अग्निप्रतिनिधित्वेन यदाधात्ता अजादयः तदाग्निपतयेति मंत्रमनूद्य स्थापयेदिमान् ॥ धृष्टाधृष्टत्वं दृष्टान्तं स
याजमानं च लुप्यते ने ध्रौर्यलोपात्पाकानी हविषा पचनं नच ॥ समूहवादयः संति संस्काराः संभवादिह ॥ इहप्रजाभवत्येव तत्पाक्
कृत्कवयोर्ग्रहः तत्तापस्यानुसंस्पृत्वार्थः समिधोयोग्यभावतः ॥ शिष्टं समानं करोतु होमद्वयविधानं ततः संसर्गदोषो नास्त्यत्र रीहि हीती
धनं न च धर्मशास्त्रावं भ्यकर्त्तव्योन विशेषोऽस्यनः ॥ अपराग्नौ होमप्रसेन त्रापि स्थापयेदृजं ॥ होमश्च कर्तो कर्ज व्योत्र तमप्यत्र व
स्यते ॥ अजस्यमांसं नाश्नीयादृक्षिवमाहाहुतौ ॥ पाणिहोमे नापरं ध्या ब्राह्मणं वा स कांसिणां ॥ दर्भासने तु नासीत दर्भहोमे व स्यते
आपोन निर्णोत्ताभिश्चपादौ न प्रक्षालयेतीच ॥ दर्वीं त्रातपंती कुर्यां द्रूर्ध्वं संवत्सरान्ततः पित्रादयन्नतिश्लोकस्य ॥ यस्य यजमानस्य पूर्व
वयसो दृधाः पित्रादयो न्नातयो वा अपरवयसः पुत्रादयश्च संततं म्रियंते तदाक्षामवत्नेष्टिः कर्तव्या ॥ तस्याः प्रयोगः ॥ इष्ट्याय
स्यदर्शादि ॥ अद्ययक्षायमाण एषं हविः यस्यां निष्पाविषिः तस्यां तिथेः कीर्तनं पौर्णमासं तंत्रं ॥ अग्नये क्षामवते जुष्टं निर्वपामि ॥
अग्ने क्षामवत हव्यं रक्षस्व ॥ अग्नये क्षामवते यो जुष्टं प्रोक्षामि ॥ अग्नये क्षामवते जुष्टमधिवपामि ॥ अग्नये क्षामवते जुष्टमभि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

धारयामि॥ अक्रं द्रग्निस्त्वेवसूनि पूर्वेणाीके तियाज्यानुवाक्ये॥ अग्नये क्षामवते नुब्रूहि॥ अग्निं क्षामवन्तं यजेति संप्रैषो॥ अग्नेः क्षामव
तोऽहमन्नादः नपार्वणाहोमः विहृई प्राशित्रं चतुर्धाकरणं च॥ अन्वाहार्यो दक्षिणा॥ अग्नेः क्षामवतोऽहमुज्जितिमिन्फजितिः यज्ञो बभू
वयस्तशंचमवर्जमिष्टिः समाप्यते॥ एषेष्टिर्यजमानस्यात्वभूनंग हात्दाहेपि कर्तव्या॥ नत्वन्यगृहवासेपितद्दाहेपि॥ श्रौतानिनेति
श्लोकद्वयस्य॥ यस्याहिताग्नेरग्नयो मैश्रौताग्निभिः स्त्रौपासनादिभिः लौकिकैर्वसः संसृज्येरन् नन्योन्येवा सर्वैसह संसृज्ये
रन्तद्दासंसृष्टेः मग्निमारण्योः समारोप्य मथितोपावरोऽस्याग्नये विचीष्टिः कर्तव्या॥ इष्टायास्य इत्यादि पौर्णमासे तंत्रं॥ अग्न
ये विविचये जुष्टं निर्वपामि॥ अग्नये विविचये हव्यं रक्षस्व॥ अग्नये विविचये वो जुष्टं प्रोक्षामि॥ अग्नये विविचये जुष्टम
धिवपामि॥ अग्नये विविचये जुष्टं संवपामि॥ अग्नये विविचये जुष्टमभिघारयामि॥ अग्नये विविचये नुब्रूहि॥ अग्निं विविचि
चोऽहमुज्जितिमिति विशेषः नपार्वणाहोमो विहृत्य प्राशित्रं चतुर्धाकरणं च अन्वाहार्यो दक्षिणा यज्ञो बभूवयस्तशंचमवर्जमिष्टिः पी
समाप्यते॥ वितेविसृग्वानद्वामन्वेमानुषीरी ते तद्दिनियाज्यानुवाक्ये॥ यदि गार्हपत्याहवनीयावन्योन्यं संसृज्येयातां तदा संसृष्टं
पूर्ववन्मथित्वोपावरोह्योऽग्नये विपृचे ष्टिः कर्तव्या तस्या विविचिवत्कल्पः॥ अग्नये विपृचे जुष्टं निर्वपामि॥ अग्नये विपृचे हव्यं रक्षस्व
अग्नये विपृचे वो जुष्टं प्रोक्षामि॥ अग्नये विपृचे जुष्टमधिवपामि॥ अग्नये विपृचे जुष्टं संवपामि॥ अग्नये विपृचे जुष्टमभि
घारयामि॥ अग्नये विपृचे नुब्रूहि॥ अग्निं विपृचं यज॥ अग्निनाविपृचा याज्याकविरग्निः समिध्यत इति याज्यानुवाक्ये॥ अग्नेर्विपृचो
हमन्नादः अग्नेर्विचोऽहमुज्जितिमिति विशेषः यदि गार्हपत्यदक्षिणाग्नि दक्षिणाग्न्याहवनीयो वा अन्योन्यं संसृज्येयातां॥ पूर्ववन्मं
थनादि कृत्वा अग्नये वीतये इष्टिः कर्तव्या तस्या इष्टेर्विविचिवद्विधिक्रमः प्रयोगस्तु विविचीष्टिवत्॥ अग्न आयाहि वीतये॥ यो अग्निं देव

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वीतयइतियाज्यानुवाक्ये॥ यदिवनदाहवाह्निनागरदाहवह्निनावाग्नेः नाग्नीनां संसर्गः तदामथनादि कृत्वाअग्नयेशुचयेष्टिः
१० कर्तव्या॥ तस्यां इष्टे विविच्य वह्निमन्त्रः प्रयोगाभ्च॥ अग्निः शुचिव्रततमः उदग्ने शुचयइतियाज्यानुवाक्ये॥ यदिसूतकाग्निनाजातकर्मा
10 ग्निनाम्नौ नाग्नीनां संसर्गस्तदामथनादि कृत्वा। अग्नयेसंकुसकायेष्टिः कर्तव्या॥ अग्नयेसंकुसकायजुष्टं निर्वपामि॥ अग्नयेसंकुसका
हम्॥ अग्नयेसंकुसकायवोजुष्टं प्रोक्षामि॥ एवमधिवापसंवापाभिघारणेषु॥ अग्नयेसंकुकानुब्रूहि॥ अग्निंसंकुसकंयज॥ अग्नेः
संकुसकस्याहमन्नादः अग्नेः संकुसकस्याहमुजितिमिसृहः संकुसकोविकुसकः अग्निन्वपः संकुसकइतियाज्यापुरोनुवाक्ये
शेषंविपच्येष्टिवत॥ यद्यशनिवह्निनाग्नौ नाग्नीनां संसर्गः तदामंथनादि कृत्वाग्नयेशमतेष्टिः कर्तव्या॥ अग्नयेशमतेजुष्टं निव
र्पामि॥ अग्नेशमनहमपृ र स्वस्व॥ एवंप्रोक्षणाधिवापसंवापाभिघारणेषु॥ अग्नयेशमतेनुब्रूहि॥ अग्निमशमंतयज॥ अग्नेरश
मतोहमन्नादः अग्नेरशमतोहमुज्जीतिमिसृहः अस्वप्नेअधिष्व॥ गर्भोअस्योषधीनामितियाज्यानुवाक्ये शेषंविविच्यवत्॥ यदीषयइ
त्यधस्य॥ विविच्याग्रशमत्वंतानाइष्टीनां निमित्तानिमञ्चोक्तमेणावा युत्क्रमणावा युगपदेववासपद्यते तदासंक्रमः इष्टीनां प्रथमं विवि
च्येष्टिः कर्तव्या॥ अनंतरं शुचीष्टिः तृतीयाव्रतपतेष्टिः एवं सर्वत्र सर्वनिमित्तसान्निपातप्रफक्काधिका अस्याः प्रयोगउपरिष्टाद्वक्ष्यते॥
अनंतरमशमतेष्टिः ततोविपच्चीष्टिः ततोवीतयइष्टिः ततः संकुसकेष्टिः अंतेक्षामवती॥ अपवाम पथमंविविच्यइष्टि कृत्वाव्रत
पतौद्वितीयां निर्वपेत॥ ततोग्नयेव्रतपतयइष्टिं कर्तव्या॥ इयमधिकास्मिन्पक्षे॥ पयोभिमंत्रेतिसाधव्लोकस्य॥ यद्यग्निहोत्रस्था
लींभीत्वापयआदित्सवेत॥ तत्रविरभिमंत्रयते॥ गर्भं स्रवंति पराचैरिति॥ ततोग्निहोत्रस्यस्थालीकार्यं समाचेत॥ संधानं करे
द्व्येः विधुंद्र द्वाणां सदृशमानेतिसंदधात॥ ततोग्निहोत्रस्कंदनमाय। श्चित्तं॥ वस्त्यमाला निमित्तानुगत्तंकुर्यात्॥ यदिस्थालीकार्यं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

समाचेत्॥ संधानं करोद्भ्यैः विधुंदृशां सम्यमानेति संदध्यात्॥ यदि स्थाली कार्यं स्तामानभवति॥ तदा स्कन्नप्रायश्चित्तं कृत्वा स्थालीं नृत्मी
मस्कृप्राश्चिप्य अन्यां स्थालीमाहृत्य द्रोहनादि कुर्यात्॥ ननु न चारणाभिमंत्रणं कर्तव्यं॥ ब्राह्मणो भावात् गर्भं स्रवेमिति प्रायश्चित्तं द्विवह
पेषु भिन्न होत्र दूष्य मेषु स्कन्नप्रायश्चित्तमेव पयस्येवाभिमंत्रणमिति केचित्॥ पर्णानि पन्नाविमधस्योन्तरश्लोकद्वयस्य॥ यः प्रवृत्तं दर्श
पूर्णमासो यजमानो मावास्यां पौर्णमासीं वा स्वकालेनैव कुर्यात्॥ सआग्रामिति विवेणो वोक्त पायश्चित्तं कृत्वा पश्चाद्वैश्वानरीं कृत्वानं
तरापतिपन्नं दर्शपूर्णमासी वा कुर्यात्॥ प्रायश्चित्तप्रयोगः पूर्वमेवोक्तः वैश्वानरीमुपरिष्टाद्व्याख्यास्यामः बौधायनमतात्प्रायश्चित्तं वैश्वानरं स्व
समानतंत्रं वा हुत्वा अनंतरापतिपन्नं दर्शपूर्णमासं वा कुर्यात्॥ समानतंत्रपक्षे प्रयोगः दृष्टार्थपक्षे॥ पौर्णमासं तंत्रं॥ अदाय्यत्तापये
ष्टुः हविः यस्मात्तिपौतन्निपे: कीर्तिनि पात्रप्रयोगकाले विंशति कपाला। निस्फ्वचद्रुहूं हूं अवशिष्टानि पात्राणि अन्वाहार्यस्थाली व्या
नि पौर्णमासवत्प्रयुनक्ति॥ निर्वापकाले अग्नये पथिकृते जुष्टं निर्वपामीति निरुप्याग्नये वैश्वानराय जुष्टं निर्वपामीति वैश्वा
नराय निर्वपति॥ किमर्थमाग्नये वैश्वानराय इति विशेषणात्स्य वैश्वानरं द्वादशकपालं निर्वपेदमावास्या वा॥ पौर्णमासीं वाति पाद्येति के
वल॥ वैश्वानरशब्दस्य श्रवणमितिचेत्॥ संवत्सरो वा अग्नि वैश्वानर इति वा कुशोपे अग्निविशिष्टश्रवणात्॥ अग्निरूपेण वा
हमेतिलिंगाच्च॥ अग्नेपथिकृद्व्यं स्थस्वग्नये वैश्वानराय त्वं रक्षस्वे रुपसादनं॥ अग्नये पथिकृते वो जुष्टं अग्नये वैश्वानराय वो
जुष्टं प्रोक्षामीति प्रोक्षणी॥ एवमधिवापसं वापौ पाथिकृतेष्टाकपालामुपधाय॥ वैश्वानरस्याष्टभिर्मंत्रैर्द्वादशकपालामुपदधाति
तत्र द्वितीयचतुर्थषष्ठाष्टमानां मंत्राणामावृत्तिः यथाभागं व्यावर्तेथामिति विभज्य॥ इदमग्नये पथिकृतः इदमग्ने वैश्वानरस्येत
भिमर्शति॥ आप्यायतां घृतयोनिरितिमंत्रेण अग्नये पथिकृते जुष्टमभिघारयामि स्पृश्य पाथिकृतमभिघारयेत् एवं वाग्नये वैश्वानरा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यजुःषमभिचारयामीति वैश्वानरमभिचारयति ॥ प्रियेणोत्या सादयति यज्ञोसीति प्रतिपुरोडाशं मंत्रावृत्तिः ॥ अयं यज्ञो ममाग्ने वर्च भवर्हीति
११ ति ॥ अग्नये पथिकृते नुब्रूहि ॥ अग्निं पथिकृतं यज ॥ अग्नये वैश्वानराया नुब्रूहि ॥ अग्निं वैश्वानरं यजेति प्रैषौ ॥ अग्नेः पथिकृते हि देवयज्या
॥ यात्राद् ॥ अग्ने वैश्वानरस्याहं देवयज्यायान्नाद् ॥ न पार्वणहोमः ॥ द्वयोर्विहृत्य माशीर्त्रे चतुर्धाकरणं च ॥ अस्यां पूर्वेष्टेः पथिकृतो मुख्यत्वात्
अनडुह्दक्षिणा केचिदन्वाहार्यमेव ॥ अतर्वैयनड्वाहे स्थापयित्वा वृषभपि नवसे सन हेनाभिमृश्य महलिधाउश्मोते नानडुह्वाति तरुणि
मस्कमिमभिमृशति ॥ वसन् ब्रह्मासीत विकारेणाभिमृशति ॥ ब्राह्मणा अयं वो नड्वा नितिदानं हृत्रयगामितिमतिग्रहः ॥ अग्नेः पथिकृ
तो हमुञ्जितिः ॥ अग्ने वैश्वानरस्याहमुज्जितीमन्त्रवाक्यो ॥ यज्ञो बभूवय स्रशं च मवर्जं ब्राह्मणभोजनीतमिष्टिसमाप्तिः आश्वलायनमतेन
याज्यानुवाक्याः वक्ष्यन्ति ॥ आरेवानामित्यग्नये पथिकृतः वैश्वानरो अजीजनत ॥ एषोदिवीति वैश्वानरस्यापि मोहि देवानिति ॥ विष्टकृतः
अपवाणारत्वांतरपस्थया श्रिमागामिपर्वणो वागतिपत्नं दर्शपौर्णमासं वा पथिकृन्मुख्यं कुर्यात ॥ तस्य सेन वैश्वानरीशारंगांतरत्वात् ॥ अन्वा
धानादि कृत्वा अग्नेः पथिकृतः प्रथमं निरूप्याग्नेयादीनां निर्वापः अत्रापि पथिकृतो मुख्यत्वाद नडुह्दक्षिणां मुख्यकाले तिपन्ने साप श्चि
त्तमुक्तं ॥ गौणकालेतिपन्ने पर्वणयागतित्वे तिपन्नकालस्य कालत्वादक्रिया ॥ यावद् त्तरेज्यापिकारार्पं प्रायश्चित्तमेव ॥ पाथिकृती वैश्वा
नरी च समानतं त्रे नानानत्रैव ॥ अत्र पथिकृन्मुख्यस्यातिपन्नस्यानवकाशः एवं द्वयोर्बहूनामप्यतिपत्तौ पाथिकृती वैश्वानरी च समान
तंत्रे नानातंत्रे वा कृत्वानंतरातिपन्नेन यजेत ॥ अनंतरातिपन्नं पथिकृन्मुख्यं वा कुर्यात ॥ द्वयोर्बहूनामप्यतिपत्तौ पर्वणयागते मायश्चि
त्तमेव नातिपन्नयागः दर्शपूर्णमासयोमध्ये क्रांतयो दैवान्मानुषाद्वा विरोधात स्वकाले तुमशक्यो शांते विरोधे अनंतरातीतस्य यआग्ने
यस्तस्य स्थाने अग्नये पथिकृते जुष्टमिति पथिकृतं निरूप्य यथाप्रकृति शिष्टानां निर्वापं कुर्यात ॥ निर्वापात् पूर्वं विरोधात्कालोतिपद्ये

नदास्विष्टकृतोधाय्यानुवाक्ये पथिकृतो कुर्यात्॥ अनयोः कल्पयोर्नैवैश्वानरी॥ एषैव तृस्त्रिरित्यर्धस्य एवं पशुबंधमाप्यसंवत्सरे कुर्वतः
स्वकाले पशुकृतस्तस्य अगामिवर्षांतोः पूर्वं पथिकृद्वैश्वानरीं कृत्वाश्वतिपन्नपशुबंधः कर्तव्यः पथिकृत्प्रमुखं वापशुबंधं कुर्यात्॥ आ
गामिवर्षांतोवागते प्रायश्चित्तमेवोत्तरेष्याधिकारार्थेयः प्रत्ययनेपशुबंधेन यजेतस्यागामिनोयनात् पूर्वं पथिकृद्वैश्वानरीं कृत्वातिप
न्नपशुबंधः कर्तव्यः पथिकृत्प्रमुखं वापशुबंधं कुर्यात्॥ आगामिवर्षांतोवागते प्रायश्चित्तमेवोत्तरेष्याधिकारार्थं॥ यः प्रत्ययनेपशुबं
धेनयजेतस्यागामिनोयनात्पूर्वं पथिकृद्वैश्वानरीं कृत्वातिपन्नपशुबंधः कर्तव्यः पथिकृत्प्रमुखं वापशुबंधं कुर्यात्॥ अयने समाग
ते प्रायश्चित्तमेवनातिपन्नयागः एवं प्रकृताग्रयणस्य शरदृत्यये आगामिन्याः शरदः पूर्वं पथिकृद्वैश्वानरीं कृत्वातिपन्नाग्रयणं कु
र्यात्पथिकृत्प्रमुखं वा॥ समागतायां शरदि पथिकृद्वैश्वानर्यैवाप्रयावक्त्वा विस्रधयोः कृतप्रथमपशुबंधस्य यजमानस्य द्वितीयादिपशुबं
धस्य यजमानस्य द्वितीयादिपशुबंधाशक्तौ पशुबंधकाले पशुबंधात्कल्पान्तरेण मनुना वैश्वानरीष्टिरुक्ता॥ इष्टिं वैश्वानरीं नित्यां वैश्वान
रीं द्विजः इतियाज्ञवल्क्येन भगवतोक्तेन॥ अस्यादृष्टेः पशुप्रत्याम्नायत्वात्॥ एतस्यां कृतायां येष्टिः प्रथमप्रयोगेन लभ्यते कल्पानांप
शुसोमानां मिथ्याकृत्वात्॥ आद्येतिपन्नदृत्यर्धस्योत्तरपंचकल्पा॥ आधानानंतरं दर्शपूर्णमासौ दैवान्मानुषाद्वाप्रायदि स्वकालेनारभे
यातां तदा शास्त्रविरोधे आगामिन्यां पौर्णमास्यां विघ्नेष्टिं प्रथमं सारस्वतहोमान्वारम्भणीयां च कृत्वा विघ्नेष्टिं कृत्वा पुनर्दर्शपौर्णमा
सार्थं सारस्वतहोमान्वारम्भणीयां च कृत्वा चिनुहोतारं च हुत्वा पौर्णमासेन यजेत कृतायामन्वारम्भणीयायां पौर्णमासेतिपद्ये॥ ततो दर्शचतु
र्होता आगामिपौर्णमासे कर्तव्यः प्रथमदर्शे प्रतिपन्ने आगामिदर्शे विघ्नेष्टिं कृत्वा स्वकाले दर्शेन यजेत॥ एवमाधानानंतरं संवत्सरे पशुबं
धे अकृते विघ्नेष्टिः प्रथमआग्रयणस्य शरदत्यये विघ्नेष्टिः पिंडपितृयज्ञलोपे कर्मलोपे वा मिति पाणिप्रक्षालनात्पूर्वं दर्शपौर्णमासहव

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

न्तोयेसप्तहोतारं जुहुयात्॥ केचित्त्विष्टयजुषः पूर्वमिच्छंति॥ अग्निहोत्रहोमारंभयदि कालेन क्रियेत तदापरोपुरपराह्ने सप्तहोतारं हुत्वासा
१२ यमग्निहोत्रारंभः आरब्धाग्निहोत्रस्य प्रागामिहोमकालादग्निहोत्रहोमकालाल्लोपे सप्तहोतैव॥ प्रारब्धाग्निहोत्रस्य अग्निहोत्रहोत्र
होमलोपे मनोज्योतिरित्याहुतिराश्वलायनमतात्॥ प्रथमे पौर्णमासे दर्शे वा प्रवृत्ते यदि मध्ये विच्छित्तिस्तदापि विमृधेष्टिः कर्तव्या॥
एवं प्रथमयोः पश्चादाग्रयणयोरपि॥ चतुर्दशीमिश्रितपर्वणि मतिपथपराह्ने पिंडपितृयज्ञो यदि न कृतस्तदा सप्तहोतारं॥ एवं चातुर्मा
स्येष्वा वरुणप्रघासकालात्पथिकृदेष्टिमनीकृत्वातिपन्नो वा वैश्वदेवः पथिकृन्मुखः कर्तव्यः तथा वरुणप्रघासाभ्यासाकमेध
कालात्साकमेधाभ्याशुनासीरीयकालात्॥ अविधानेन विनष्टवन्हेस्मार्तिचोदितं चांद्रायणादि कर्तव्यं॥ ततोग्नीनाधाय लुप्ता
नामिष्टीनां पथिकृदेष्टिमनरीं कृत्वानंतरातिपन्नं कुर्यात्॥ लुप्तानामग्निहोत्राणां पिंडपितृयज्ञानां च सप्तहोतानंतरातिपन्नस्य च
ग्निहोत्रस्य च होमः वाजसनेयिमतात्॥ नैमित्तिकमाधानं शिवाजपीतं कर्तव्यं नेष्टयः अथ विमृधेष्टिः दृष्ट्वायष्ये॥ विधृदृष्टि अ
द्यपत्नायरोषड्॰ हविः यस्यांति पौनस्यातिथेः कीर्तनं॥ आमावास्यातंत्रं॥ अन्वाधाय व्रतोपायनं॥ वेदं कृत्वा वेदिः पात्रप्रयोगे एको
नविंशतिकपालानि चरुस्थालीं स्फ्यं च हृदं हृदोहनपात्रवर्जं प्रकृतिवत्प्रयुनक्ति॥ निर्वापकाले आग्नेयं निरूप्य॥ ऐंद्रं निरूप्य॥ सो
मायजुष्टं निरूप्य॥ अग्नेर्हव्यं२ रक्षस्वेंद्रहव्यं२ रक्षस्व सोमो हव्यं२ रक्षस्व॥ अग्नये वो जुष्टं प्रोक्षामि॥ इंद्राय वो जुष्टं प्रो सोमाय वो जुष्टं
प्रोक्षं स्रालनं निनीय तंडुलान्द्वेधा कृत्वा द्विभागमेकीकृत्य राशिद्वयं यथाभागं व्यावर्तेथामिति पश्चिमभागद्वयमि। ग्नितं राशिमिदमग्नेरि
इंद्रस्येत्यभिमृश्य इतरं राशिमिदं सोमस्येत्यभिमृश्य पश्चभागद्वयस्योपवेषणार्थं कृष्णाजिनदानादि कृत्वा॥ अग्नये त्वा जुष्टमधिवपामि इं
द्राय जुष्टमधिवपामि धान्यमसि तदधिवपति॥ एवं संवापः अधिश्रयणकाले आग्नेयं सौम्यं चांद्रं यथाधामं सर्वोभवतस्य पासंन्निधा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

निरूपीष्यधिश्रयेत॥ अपवग्नेयस्य सौम्यस्य च लेपौगृहीत्वारोद्रे च चिपन्ति॥ मंत्रेणाग्नेयमभिघार्यं॥ नहवी मितरौ॥ प्रियेणेत्यासादनं॥ यत्तो
मिअर्धपतः योनः कनीयः अपतमिं द्रोमुः ममग्नेपंच होता॥ आग्नेयस्य मकृतिवधुनाउमंत्रणं॥ इंद्रस्या इंद्रियामन्वाद् सोमस्याहं
वृत्रहाआग्नेयस्य तिात्वमोरविहृत्य प्राशित्रं न चतुर्धाकरणं॥ स्त्रवाहायौ दत्तिणा॥ यत्तो वभवयत्त शंवमवर्जमिषिः समाप्यते॥
आपस्तंवमते न होत्रं॥ पंचदशसामिधेन्यः वात्रघ्नावाज्यभागौ॥ सम्प्रत्नवन्ति काम्येत्याग्नेयस्य॥ इंद्रं वाविश्वनः परी इंनरइस्येदं स्पत
न्रः सोमविश्वतोयातेधामानीति सोमस्य पूर्णेति। पिपंचदशी। मितिमव्रश्वो कस्य॥ चतुर्दशीं पंचदशी पंचदशी। मिति स्नात्वामावास्या
र्धमस्यी ननाथायभ्योमन्ने निरूपे हविष्य कालेप्रवृत्तमिति स्नाते निरूमश्री हीस्त तुलीकृत्य संक्षालन निनयनानंतं कृत्वात्रेधानृत्यमीं
विभज्य स्थूलनमैस्तं तुलैरेकोणि षेरकोमध्यमैरेकल्तपा विविच्यविभजेत॥ नदेवतोपल्लक्षणं॥ मध्यमानांतं तुलानामग्नये दात्रे
जहषमधिवपामिइस्यधिवाचा दिकृत्वा ष्टासक कपालेषु धिश्रयति॥ एषआग्नेयस्थाने भवति॥ ये स्थूलास्तं तुलास्ताानिंद्राय प्रदात्र
इति वुध्वाचरुधर्मेणयजरूप्यूतेसार्पयेहे रपमधि श्रयतिये ।णिष्ठास्तं तुलास्ताक्ष्वुरुधमेंणविष्णवेशिपिविष्टायेति वुध्यपजु
रुत्पूते मातदेहि पयस्यधिश्रयति॥ ऋवोसीति सान्नाय स्थानीयरुपधानं चरुधर्मेण चोपहिता यां कुंभ्यां शाखापवित्राम्यां धा
नादिसंक्षालननिनयनांतं प्रातर्दोहे दोहपित्वाभगणामिस्यंगारापहनादिकरोति॥ पिष्टानामुत्पवनकाले तंतुलानुत्पूयदे
वस्त्वासविनोत्पुनात्विति दधिपयसो ऽत्पवनं धर्मोऽसीत्यादि चरुपुरोडाशधर्मात्यया पूर्वं कुर्यात॥ दोहयोः स्रयणस्थानाच्चवीरुद्धा
स्मनाहृद्धं दधिधर्मान्भवेयुः सर्वज्योतिरिति हवींषि व्यभिमंत्र अग्नये दात्रे जहषमभिघारयामि इति पुरोडाशं॥ तत्समींदधि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

चरुमभिघार्य ॥ आप्यायतां विष्णवे शिपिविष्टाय जुष्टमभिघारयामीति मन्त्रेण चरुमभिघारयन्ति ॥ यत्त आत्मेति केचित् ॥ पुरोडाशादधि चरुं पुरो
१२ डाशप्रकारेणोद्वास्य हृदयंगमा इति मन्त्रेण चरुमुद्वासयन्ति ॥ नालंकरणं चर्वोः न तत्र विशेषः पंचहोत्रासादनादि यथाप्रकृति । अवदानकाले
13 चर्वोर्नानाप्रचारः अग्नये दात्रेऽनुब्रूहि ॥ अग्निं दातारं यज ॥ इन्द्राय प्रदात्रेऽनुब्रूहि ॥ इन्द्रं प्रदातारं यज ॥ विष्णवे शिपिविष्टायानुब्रूहि ॥ विष्णुं शि
पिविष्टं यजेति संप्रैषौ ॥ अग्ने दातानुरहमन्नादः इन्द्रस्य प्रदातारिंद्रिया वीजेमानमिति वा ॥ विष्णोः शिपिविष्टस्य इंद्रिये वीजेमानमिति वा अ
ग्नेर्दातुरहमुपहूय दानो अग्ने शतिन तमग्ने दातः प्रदातारं हवामहे प्रदानावन्ती इन्द्रस्य प्रदातुः वषट्कृते प्रतन्त्रे अग्ये इति विष्णोः
शिपिविष्टस्य पार्वण होमादि यथाप्रकृति ॥ यजमानभागे पूर्व कृत्वा पगवदायस्थापयेत् ॥ प्राशनकाले स यत्न पतिरिति पुरोडाश
प्राशप दधि चरुं दधिक्राव्णो इति इदं हविरिति पयश्चरुं प्राश्नाति ॥ एतयेष्ट्या दर्शः कृतो भवति न पुनरीज्या ॥ अग्न्यन्वाधानप्रभृति पुनर्द
र्शक्रियां कुर्यात्तत्र ॥ अथवा व्रतचर्या औपवसथ्याभ्यासं वा कुर्यात् ॥ अथ यस्यागृहीतमिति वक्ष्यमाणेन सूत्रेण ॥ एतेन निरूप्ते हविषि पक्ष
त्रयं विकल्पेन भवति ॥ निर्वापात्पूर्वं यदि कालेय पन्नमिति ज्ञातं तदा प्राकृतीभ्यो निरूप्य प्रक्षालननिनयनान्ते पूर्ववदन्वाधानं तुल्यानीत्या
दिभ्युदयेष्टिः कर्तव्या ॥ अथवा निर्वापप्रभृत्यग्निदात्रादिभ्य एव निर्वापादि कृत्वाभ्युदयेष्टिः कर्तव्या ॥ पक्षद्वयेपि न पुनरीज्या ॥
अस्मिन्नेव विषये यस्यागृहीतमिति सूत्रेण व्रतचर्या वा कर्तव्या ॥ तद्दशकौ त्रेधा तंडुलानि त्यायाभ्युदयेष्टिं कृत्वा पुनरग्न्यन्वाधाना
दि विकृतं दर्शं च कुर्यात् ॥ तस्मादनिरूप्ते भ्युदिते इत्यस्मिन्पक्षेपि प्राकृतीभ्यो निरूप्यापनीय दात्रादिभ्यो निरूप्य कल्पाभ्युदये
ष्टिर्वा व्रतचर्या पुनरीज्या सहिताभ्युदयेष्टिर्वेति पक्षत्रयं भवति ॥ अर्धनिरूप्ते त्रेधा तंडुलानीति ज्ञात प्राकृतीभ्य एव शेषं निरूप्य प्रक्षा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ननिनयनं तेत्रेधा तंदुलानीमादि प्रथमकल्पवत्॥ पत्न्यरजसि निरुप्तमित्य मिलितौ॥ हितेनिमित्ते प्रातर्दोहात्पूर्वं तेनैव तद्दृष्टमेवापाकृत्वान्वष्टान्मातभिः सं ८ हजसा
पयो हेमन्द्रपयोहिरवे॥ दोहात्पूर्वं व्रतचर्यायां तिकेचित्॥ व्रतचर्यापाः प्रयोगः पूर्वस्मात्तिथ्यावेवाकालेप्रवृत्तमितितत्तत्पाणोपकरणादूर्ध्वमाग्नि अन्वाहितान्नो अश्वाद्येत्॥
नमः सायंदोहार्थं प्रपाकृत्वान्वष्टान्मातभिः सं ८ हजेत्॥ सायंदोहेमेनयवागूहोमः॥ व्रतचर्यादिनियमाननुतिष्ठेत्॥ श्वोभूतेवत्सापकरणादिकृत्वा पर्वेधं कृत
शाखमोपवमथ्यं कृत्वा यवागूमायंहोमादि दर्शक्रियां कुर्यात्॥ सायं दुग्धे व्रतचर्यापक्षे दुग्धं दध्यातं चनापेनिधाय प्रातर्दोहार्थमपाकृत्वान्वष्टामातभिः सं ८
हजस्वो भूतेसायं पयोदोहार्थं वत्सानपाकृत्य पर्वेधुः कृतशाखमोपवमथ्यं कृत्वा यवागूहोमादि सायं दोहे दुग्धे पूर्वदुग्धे न दध्यातं चनेकृत्वा श्वोभूते दर्शयागं कुर्यात्॥
प्रातर्दोहे दुग्धे पुरोडाशे च कृते न्नाते व्रतचर्यायां च॥ नाभ्युदयेष्टिः पुरोडाशामासे विनिश्चिपेत्॥ आपातयामत्वाप॰ प्रातर्दोहमपिपयस्याद्धिनभवतितथाग्निसंयोग
नास्येत्॥ सायंदोहार्थं वत्सानपाकृत्य सायं दोहे दुग्धे मूर्ध्वं कदुग्धे न दध्यातमश्वोभूते पयामकृत्वि कृतान्तानामकाम्पदर्शयागः॥ पूर्वं कृः मिश्रावेवाग्नेय प्रातर्दोहे
यागे कृते अकाले कृतमिति प्रवृत्ते सर्वप्रायश्चित्तं कृत्वाग्न्याधानाद्यविकृताममावास्यां कुर्यात्॥ आमस्यानाप्यपाजिनो भक्षदपेष्टिप्रयोगोदधिपयसो भावात्
॥ जलेचर्योश्च पात्रैतैं हृयविकारो चरु॥ पौर्णमासे अकाले प्रवृत्ते नाभ्युदयेष्टिः॥ नापिन्नतचर्या अरस्थाण प्रकारोणात्पौर्णमास्ये संभवत्सर्वप्रायश्चित्तं कृत्वा॥
कालेयागः कर्तव्यः॥ अन्वाहितेनिसोर्धम्नो क्रम॥ यथाहिताग्निः सन्नानं तवदेहि॥ मादिम्सञो क्रमानोव्रतानां लोपं कुर्यात्॥ तस्याग्नये व्रतपतये पुरोडाशः कर्तव्यः॥
अनाहिताग्निः सन्निमादिव्रतग्रहणात्॥ संवत्सरं नेकं चनप्रसवरो हेत्॥ यावज्जीवं नकंचन प्रसवरो हे दिस्मादिमादि अग्निचिदादिव्रतलोपे नव्रातपतये सर्वप्रा
यश्चित्तमस्तानहोम श्व॥ व्रतादानिके न संवत्सरमासोत्पत स्मिन्संवत्सरे यजमानस्य प्रवासे यदि प्रयापादिसादिनो क्रमप्रायश्चित्तं॥ तस्मिन्संवत्सरे मासाद्यना
देनव्रातपतये अंनाहातव्यमेव॥ अन्वाधानेकृते यजमानो ग्रामांतरं गत्वा न तत्र वसेत्॥ तस्यापिव्रातपतये॥ अन्वाधाना त्पूर्वं प्रोषितस्य नैत त्प्रायश्चित्तं॥ यागे॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

के.
२५
15

निहृते सप्रागते स्रेत अग्नेन रमन्वाधानादि संग्रीवात तपतीं कुर्यात ॥ प्रधानयागान् सर्वे समाप्त गतस्रेत् पशुपुरोडाशवत् ॥ तदेवं त्रुपुपत्नी अग्ने व्रतपतये कपालानि मग्र
मग्नानावीजवस्माद्वीप्रपर्भेदे कृत्वा प्रणयनं निर्वापादि करोति ॥ यागकाले व्रतपति निमित्ता अग्ने पारीनो यागः ॥ अन्वाधानादिसु सेन्द्रीण मनेमोमासा राने बुद्धिपूर्वेत स्कंदे
समानतंत्रे रुकृतया ॥ अबुद्धिपूर्वेति स्कंदेन स्नातप्रायश्चित्तं ॥ व्रातपमाः प्रयोग ॥ रक्ष्यापस्से पौर्णमासे तंत्रं ॥ अपपुत्वाय अग्नये व्रतपतये जुहुं ॥ अग्ने व्रतप
